# धात्वर्थविभागयोः निरूपणात्मकमध्ययनम्

टीकारामः दहालः

उपप्राध्यापकः

ने.सं.वि. पिण्डेश्वरविद्यापीठम्, धरानम्

tikaram.dahal@nsu.edu.np

DOI: https://doi.org/10.3126/dristikon.v11i1.39173

## सारतत्त्वम्

भू वा पठ् इत्यादयः क्रियावाचिनः धातुपाठे पठिताः सकलशब्दानामाधारभूताः धातवः सन्ति । धातुः मूलरूपेण क्रिया तथा नामसर्वनामविशेषणाव्ययपदानां व्युत्पादकः बीजरूपेण परिपोषकश्च वर्तते । व्युत्पादनस्याधारभूतत्वादेव धातोः कृत् प्रत्यये सति कृदन्तपदानि नामादीनि तथा तिङ्प्रत्यये सति तिङन्तपदानि व्युत्पन्नानि भवन्ति । कर्तरि कर्मणि भावे चार्थे धातोः लट्, लिट् इत्यादयः दश 'लकाराः' भवन्ति । कर्तरि लकारे सति कर्तृवाच्यस्य क्रियापदानि कर्मणि लकारे सति कर्मवाच्यस्य क्रियापदानि तथा भावे लकारे सति भाववाच्यस्य क्रियापदानि व्युत्पन्नानि भवन्ति । लकारस्य स्थाने तिबादयोऽष्टादश तिङ्प्रत्यया आदिश्यन्ते । ततः धातोः तिङ्प्रत्ययसंयोजनेन तिङन्तपदानां रचना भवति । एतानि तिङन्तपदानि आख्यातपदनाम्ना क्रियापदनाम्ना च पदविभागेषु प्रसिद्धानि सन्ति । धातोरनेके विभागाः सन्ति । विविधान्नाधारान्नाधृत्य विभागान्नध्येतुं शक्यते । धातोः गणपाठानुरूपम्, व्युत्पादनप्रक्रियानुरूपम्, कर्मग्रहणदृशा तथा इडागमसहिताः सेटः इडागमरहिताः अनिट्रूपेण विभागाः दृश्यन्ते । ते च सर्वे विभागाः कार्यपरकतया विभक्ताः विलोक्यन्ते । प्रथमतः गणपठिताः धातवः आद्यधातोः नाम्नैव स्थापिताः भ्वाद्यदादिजुहोत्यादिदिवादि-तनादिक्र्यादिस्वादिचुरादयः दश गणेषु निबद्धाः सन्ति । कर्मग्रहणदृशा च धातोः सकर्मकाकर्मकः विभागः शास्त्रेषु व्यवहृतः समुपलभ्यते । रूपायन सन्दर्भे इडागमसहितेन रूपायितः सेट् तथा तद्रहितः अनिट् इति धातोः विभागश्च कृतो विलोक्यते । येभ्यः धातुभ्यः परस्मैदिनः तिङ्प्रत्ययाः भवन्ति ते परस्मैपदिनस्तथा येभ्यः आत्मनेपदिनः तिङ्प्रत्ययाः उत्पद्यन्ते ते चात्मनेपदिनः धातुरूपेण विभक्ताः विद्यन्ते । येभ्यः परस्मैपदिनस्तथात्मनेपदिनश्चोभयविधः तिङः जायन्ते ते च धातवः उभयपदिनः मन्यन्ते ।

*शब्दकुञ्जिका* : सेट्, गणानुरूपम्, व्युत्पादनम्, व्यापारार्थः फलम्

## विषयपरिचय

"डुधाञ्" 'धारणपोषणयोः' इति धातोः औणादिके तुन्प्रत्यये कृते धातुरिति पदं निष्पद्यते । भू वा पठ् इत्यादयः क्रियावाचिनः धातवः सन्ति। सकलपदानामाधारभूतः धातुः मूलरूपेण पदानां धारकः व्युत्पत्याधायकः पोषणकर्ता च वर्तते । धातोः कृत् प्रत्यये सति कृदन्तपदानि तथा तिङ्प्रत्यये सति तिङन्तपदानि व्युत्पन्नानि भवन्ति । कर्तरि कर्मणि भावे चार्थे धातोः लट्, लिट् इत्यादयः दश 'लकाराः' भवन्ति । लकारस्य स्थाने तिबादयोऽष्टादश तिङ्प्रत्यया आदिश्यन्ते । ततः धातोः तिङ्प्रत्ययसंयोजनेन तिङन्तपदानां रचना भवति । तिङन्तपदान्याख्यातपदनाम्ना पदविभागेषु प्रसिद्धानि सन्ति ।

मीमांसकाः फलम्, नैयायिकाः व्यापारं तथा वैयाकरणाः फलव्यापारौ चेति स्वस्वदर्शनानुकूलं धात्वर्थं जगदुः । भूसत्तायामित्याद्यर्थनिदर्शनमपि प्रधानार्थनिर्देशनमेव । वस्तुतः धातवोऽनेकार्थाः भवन्ति । तेऽनेकान् क्रियात्मकान्

भावान् बोधयन्ति । कर्तृकर्मसंख्याकालाः तिङर्थाः सन्ति । वैयाकरणास्तु फलव्यापारौ धात्वर्थौ आख्यातार्थो भावना इत्यामनन्ति । एतेन धातोरर्थविषयकं दर्शनपथगतं वैविध्यमपि स्पष्टतामायाति ।

गणानुरूपेण सेडनिट्रूपेण सकर्मकाकर्मकरूपेण व्युत्पादनदृशा मूलव्युत्पन्नरूपेण च धातोः विभागाः शास्त्रकारैः परिकल्पिताः प्राप्यन्ते । एतेषां विभागानां धातोः सन्दर्भेऽतीव महत्वमावहति । समेषां शब्दानां मूलभूतस्य धातोरर्थस्य विषये मतभेदो दृश्यते । धातोः विभागानां तिङन्तपदव्युत्पादकानां लकाराणां तथा लादेशानां तिङ्प्रत्ययानां च प्रकार-निदर्शनपुरस्सरं परिचयमात्रमुपस्थाप्यते । धातोः धात्वर्थस्य धातोर्विभागस्य विश्लेषणमस्यालेखस्य महत्वपूर्णा उपलब्धिः विद्यते

**समस्याकथनम्**

धातवः भाषायां महत्त्वपूर्णं स्थानमावहन्ति सकलशब्दमूलभूतत्वेन । धातुत एव पदानि व्युत्पादितानि भवन्ति । तस्मात् धातोः परिचयोपस्थापनपुरस्सरं तदर्थनिरूपणपूर्वकं भातूनां विविधप्रकाराणां समीक्षणकार्यं स्वयमेव महत्तामावहति । धातुविषयकोऽयमालेखः निम्नालिखितासु शोधसमस्यासु केन्द्रीकृतं वर्तते -

क) को धातुः ? कश्च तदर्थः ?

ख) धातोः प्रकाराः कति सन्ति ? के त चे ?

**उद्देश्यम्**

संस्कृतभाषायां धातूनामध्ययनाध्यापनसम्बद्धा परम्परा दृढतरा विद्यते । स्वयमेवाचार्यः पाणिनिः स्वकीयाष्टाध्याय्याः पूरकरूपेण धातुपाठं निर्दिशति । संस्कृतवाङ्मये समुपलब्धानां धातूनामनेके प्रकाराः सम्भवन्ति । अत्र तु धातूनां परिचयोपस्थापनपूर्वकं विविधान्नाधारान्नाधृत्य तेषां प्रकाराणां निरूपणपूर्वकं तेषां परिचयोपादानमेवास्यालेखस्य महत्वपूर्णमुद्देश्यमस्ति । आलेखोऽयं निम्नालिखितेषूद्देश्येषु केन्दीकृतं वर्तते -

क) धातोः परिचयोपस्थापने तदर्थपरिशीलने च,

ख) धातोः प्रकाराणां निदर्शने तथा तेषां परिचयोपादाने ।

**अनुसन्धानविधिः सीमा च**

पुस्तकालय एवाध्येतृणां कृतेः ज्ञानस्य भाण्डागारमस्ति । धातूनां परिचमुपस्थाप्य धातोः प्रकारामन्वेषणं विश्लेषण्ञ्चात्र विधीयते । तस्माद्धातोः विभागानां निरूपणाय पुस्तकालयतः एव सामग्रीसङ्कलनं विधीयते । धातुविषयसम्बद्धानि विविधानि पुस्तकानि पुस्तकालये प्राप्यन्ते । तस्मादनुसन्धानकार्यं सम्यक्तया समापयितुं सामग्रीसङ्कलनाय मूलरूपेण पुस्तकालयस्योपयोगो विहितः वर्तते । स्थापितानां सिद्धान्तानामाधारे तुलना-विश्लेषण-व्याख्या-आगमन-निगमन-कार्य-कारणविधीनां चोपयोगो विहितः विद्यते । शोधकार्येऽस्मिन् द्वितीयकस्रोतसः प्राप्तसामग्री-विश्लेषणस्याधिक्यं विद्यते । सहजतया बोधनाय वक्तृविवक्षाधीनेषु वाक्येषु प्रायः सन्धिर्न कृतः । धातोः धात्वर्थस्य तथा धातोः विभागानां निरूपणात्मकमध्ययनमेवास्याध्ययनकार्यस्य सीमा वर्तते ।

**पूर्वकार्यसमीक्षणम्**

क) "सर्वं च नाम धातुजमाह नामानिआख्यातजानीति व्याकरणे शकटस्य तोकम्" इत्याद्युक्तेः धातुरेवः सर्वशब्दमूलमिति निश्चीयते (पतञ्जलिः, ३।१।३) ।

ख) आचार्यः पाणिनिश्च भूवादयो धातवः (पा.सू १।३।१ )सूत्रेण धातुसंज्ञां निर्दिशति ।

ग) कौण्डभट्टादयः फलव्यापारौ धात्वर्थौ आख्यातार्थो भावना इत्यामनन्ति (भट्ट, पृ.२२) ।

घ) मीमांसकेषु मण्डनमिश्रो फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति ब्रवीति ।

ङ) फलमात्रं धात्वर्थो आख्यातार्थो भावना इति प्रभाकरः ।

च) पाणिनेः एकाच उपदेशेऽनुदात्तात् (पा.सू.७।२।१०)सूत्रम् इडागमं निषिध्य सेट् अनिट् रूपेण धातून् विभजति।

छ) लः कर्मणि च भावे चकर्मकेभ्यः (पा.सू. ३।४।६९) इति पाणिनेः सूत्रम् लकाराः सकर्मकेभ्यः कर्तरि कर्मणि तथाकर्मकेभ्य कर्तरि भावे च विधाय सकर्मकाकर्मकरूपेण धातून् विभजति ।

ज) प्रौढमनोरमायाम् अर्थवत् सूत्रे ऽथर्वणः प्रातिशाख्यस्योद्धरणम् 'को धातुः, कः प्रत्ययः किम् प्रातिपदिकम्' इत्यादिश्च समुल्लिखितं विद्यते (दीक्षित, पृ. २७२) । एतेन धातोः भाषातत्वरूपेण वैदिककालादेव प्रसिद्धिरासीदिति सिध्यति ।

एतैः पूर्वविहितकार्यैः धातोः स्वरूपाणाम्, प्रकारनिरूपणे आधारभूतानां तत्वानाञ्च स्पष्टतरं स्वरूपमुपस्थितं भवति । तदेवास्यालेखस्य समीक्षणात्मकः विषयः विद्यते । एभिः पूर्वकार्यैः एकत्रैव भाषायामतीव महत्वपूर्णं स्थानमावहतस्य धातोः स्वरूपस्य धात्वर्थस्य तथा प्रकाराणां च निरूपणमत्र विहितमस्ति ।

## विश्लेषणम् तथा प्राप्तिश्च

### धातोः परिचयः

दधति शब्दस्वरूपान् इति विग्रहे "डुधाञ्" 'धारणपोषणयोः' इति धातोः औणादिके तुन्प्रत्यये कृते धातुरिति पदं निष्पद्यते । सर्वेषां शब्दानां, सर्वेषां क्रियापदानामेव मूलरूपं धातुरेव विद्यते । एतेन सर्वेषां पदानामाधारभूतः पोषकः तत्वरूपः धातुरिति शब्दस्यार्थः भवति । धातु शब्दस्यार्थो धारयिता पोषयिता वा भवति । अर्थात् यो धारयति पोषयति वा सः धातुरिति निगद्यते । एतेन धातु नहि केवलक्रियापदस्यापि तु सर्वेषां पदानाञ्चाधारभूतः परिपोषको विद्यत इति च स्पष्टं भवति । 'सर्वं च नाम धातुजमाह नामानि आख्यातानि च' इति प्रसिद्धनिरुक्तवचनादेव स्पष्टं भवति यद् सकलशब्दमूलं धातुरेवेति ।

तत्र पाणिनेः भूवादयो धातवः (पा.सू.१।३।१) सूत्रं धातून् परिभाषयति । क्रियावाचिनः भूप्रभृतयो गणपठितास्तथा वा सदृशाः धातवः धातुसंज्ञां लभन्ते । एतेन क्रियावाचकत्वं हि धातुत्वस्याधारभूतं तत्वं विद्यत इति स्पष्टं भवति । "सर्वं च नाम धातुजमाह नामानि आख्यातजानीति व्याकरणे शकटस्य तोकम्" इति महाभाष्यस्योद्धरणेन धातोः सकलशब्दमूलभूतत्वमवगम्यते । तत्र मूलधातवः धातुपाठेषु भ्वाद्यदादिजुहोत्यादिषु दशगणेषु विभज्य पठिताः सन्ति । णिच् सन् क्यजादिभिरनेकैः प्रत्ययैः निष्पन्नाः धातवः व्युत्पन्नाः धातवः सन्ति । धातोः गणपठितत्वाभावेऽपि धातोरथवा नामादिभिश्च प्रत्ययोत्पत्तौ ते धातुत्वमाप्नुवन्ति । एते धातवः नहि केवलाख्यातपदानामपि तु समेषां पदानामेव बीजरूपः आधाररूपः विद्यते ।

### धात्वर्थस्य निरूपणम्

समेषां शब्दानां मूलभूतस्य धातोरर्थविषये विदुषां महान् मतभेदो दृश्यते । पदवाक्यप्रमाणज्ञाः विशेषेणेह विवदन्ते गभीरम् । सर्वेऽपि स्व-स्वकीयसिद्धान्तानुरूपं स्वाभिमतं जगदुः । तत्र मीमांसकाः भिन्नतया धात्वर्थं विवेचयन्ति । न्यायदर्शनपथगामिनः एनं भिन्नमापयन्ति । वैयाकरणाश्चैनं पृथक्तया साधयन्ति । तत्र प्रथमं धात्वर्थबोधनाय फलव्यापारशब्दयोरर्थावबोधनमावश्यकम् भवति । 'देवदत्तः ओदनं पचति' इत्यस्मिन् वाक्ये डुपचष् (पच्) पाके धातोः लटि पचति क्रिया निष्पन्ना विद्यते । तत्र फुत्कारत्व, अधःसन्तापनत्व, तण्डुलप्रक्षालन-स्थालीसन्तापन-जलसंयोजनादिरूपः विक्लित्युत्पादनाकूलः क्रियाव्यापारः पच् धातोः व्यापारार्थः वर्तते । तथैव तत्र पूर्वोक्तैः क्रियाव्यापारैः तण्डुलेषु विक्लित्तिः जायते । सैव विक्लित्तिः पच् धातोः फलमर्थः वर्तते । सामान्यतो इत्येवावधेयम् ।

मीमांसकाः मण्डनमिश्रः प्रभाकरादयः फलं (तण्डुलेषु विक्लित्यानयनमेव) धात्वर्थो व्यापारः (फुत्कारत्वाधःसन्तापन्त्वादिक्रियाव्यापारः) प्रत्ययार्थः (तिङर्थः) इति वदन्ति । एतेषां मते फलमात्रं धात्वर्थः, व्यापारस्तु तिङ्प्रत्ययस्यार्थः वर्तते (भट्टः, पृ. २८) । धातोस्तिङ्प्रत्ययस्य च संयोजनेन क्रियापदस्य निष्पत्तिः भवति । आख्यातं नाम क्रियापदम् । आख्यातार्थो भावना वर्तते । भावना नाम उत्पादना क्रिया विद्यते ।

अत्र मीमांसकमतेन फलमात्रस्य धात्वर्थत्वे ग्रामो संयोगवान् इतिवद् ग्रामो गमनवान् इति प्रयोगापत्तिः स्यात् । धात्वर्थसंयोगरूपफलस्य ग्रामे विद्यमानत्वात् । किञ्चास्मिन् मते व्यापारस्य धात्वर्थाभावात् घटं भावयति इत्यत्र सत्तारूपफलाश्रयत्वेन घटरूपकर्मणः विद्यमानत्वात् द्वितीयोत्पत्तिर्भवति । तथैव घटो भवतीत्यत्रापि सत्तारूपफलाश्रयत्वेन कर्मत्वापत्तौ द्वितीया स्यात् । व्यापारस्य धात्वर्थाभावे धातूनां सकर्मकत्वाकर्मकत्वव्यवस्थापि न स्यात् । लः कर्मणि च भावे चकर्मकेभ्यः (पा.सू. ३।४।६९) इति सूत्रेण विहिता सकर्मकेभ्यः कर्तरि कर्मणि तथाकर्मकेभ्यः कर्तरि भावे च लकारविधानव्यवस्था चोच्छिद्येत । सकर्मकत्वं हि स्वार्थफलव्यधिकरणव्यापारवाचकत्वं भवति । तत्र स्वार्थफलसमानाधिकरण-व्यापारवाचकत्वमकर्मकत्वं बोध्यम् । मीमांसकमतस्वीकारे व्यापारस्य धात्वर्थत्वाभावेन कृञ्धातोः व्यापारार्थाभावे यत्नार्थकयतीधातोरिवाकर्मकत्वं दुर्वारं भवति । यथा चोक्तं भूषणे "यतीः प्रयत्ने इतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्मकतापत्तिरुक्तरीत्या दुर्वारा " इति विवरणाच्च धातोर्व्यापारार्थवाचकत्वसिद्धेः मण्डनमिश्रप्रभृतीनां मीमांसकानां मतमपूर्णम् प्रतीयते (भट्टः, पृ. ३१) । तन्मते पचति इत्यस्य पाकमुत्पादयति इत्यर्थः भवति । वस्तुतस्तु पाकानुकूला भावना तदृश्युत्पादना चेति भावः स्यात् । तस्मादेव समानार्थकत्वाद् धातोरपि भावनावाचकत्वमावश्यकम् भवत्येव ।

तत्र प्राचीननैयायिकास्तु व्यापारमात्रस्य धात्वर्थत्वं स्वीकुर्वन्ति । यथा चोक्तं गदाधरेण "व्यापारमात्रस्य धात्वर्थत्वात्" (भट्टः, पृ. ३१) इति । नव्यनैयायिकास्तु फलव्यापारयोर्धात्वर्थं स्वीकृत्य कृतिराख्यातार्थ इत्यामनन्ति । इह नैयायिकनये कृतेः प्राधान्यम् भवतीत्याहुः ।

प्राचीननैयायिकमतेन व्यापारमात्रस्य धात्वर्थेऽनेके दोषाः समापतन्तीति । तत्र धातोः फलवाचित्वाभावात् धातोः सकर्मकत्वाकर्मकत्वव्यवस्थोच्छिन्ना स्यात् । किञ्च क्रियते घटः स्वयमेव इति प्रयोगश्च दुर्लभः स्यात् । फलस्य धात्वर्थत्वाभावे कृञ्धातोः यत्नमात्रार्थकत्वे यतीधातोरिव-फलस्थानीययत्नवाचकत्वेनाकर्मकत्वात् कर्मवद्भावाप्राप्तौ उक्तप्रयोगो न स्यात् । अत उत्पत्तिरूपफलानुकूलव्यापार एव कृञ्धात्वर्थः स्वीकरणीयः भवति । ततोऽपि महान् दोषस्तु त्यजिगम्योपर्यायतापत्तिश्च भवेत् । विभागानुकूलव्यापारः त्यजिधात्वर्थो वर्तते चेत् संयोगानुकूलव्यापारो गम्धात्वर्थः । संयोगावियोगानुरूपं फलमुभयत्र समानत्वात् भिन्नत्वेऽपि फलस्य धात्वर्थत्वाभावेन एतयोरिह वैलक्षण्यं विद्यते । फलस्य धात्वर्थाभावे तु गतिरूपव्यापारसामान्येन द्वयोः साम्यात् समानार्थकतापत्तिश्च स्यात् । अत्र कौण्डभट्टश्चावादीत् "धातूनां फलवाचकत्वे त्यजिगम्योः पर्यायतापत्तिः क्रियावाचकत्वाऽविशेषात्" इति । तथा च धात्वर्थत्वेन विक्लित्तिरूपफलावाचकत्वे द्व्यर्थः पचिरिति भाष्याभिमतं च दूष्येत । विक्लेदना निवर्तना च पचेरर्थः । तण्डुलान् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः । नव्यास्तु फलव्यापारौ धात्वर्थत्वेनोररीकुर्वन्ति परं कृतिरेव आख्यातार्थः इति तेषामतमपि दोषावहं विद्यते ।

एते नव्यनैयायिकाः फलव्यापारयोः धात्वर्थत्वं स्वीकृत्याख्यातार्थः कृति इत्यामनन्ति । तेषां मते न त्वाख्यातार्थः कर्ता प्रथमान्तपदादेव तल्लाभादनन्यलभ्यस्यैव शब्दार्थत्वात् । तन्नये कृतौ शक्तिस्वीकारे लाघवमपि विद्यते । लाघवन्तु शक्यतावच्छेदकदृष्ट्यैव । कर्तरि शक्तिः स्वीक्रियते चेत् कर्तृत्वं कृत्याश्रयत्वमेव भवति। एवञ्च कृतिराश्रयभेदादनेका भवतीति शक्यतावच्छेदकत्वे गौरवं, शक्यतावच्छेदकभेदात् शक्तिनानात्वप्रसङ्गाच्चेति । परं नेदं नैयायिकमतं स्वीकारार्हं तेन "रथो गच्छति" इत्यादौ बोधो न स्यात् । यतः कृतेश्चेतनमात्रवृत्तित्वं भवतीति रथस्याचेतनत्वात्, कृत्याश्रयत्वस्य रथेऽपि विद्यमानत्वात् । किञ्चाख्यातस्य कृतिवाचकत्वे पुरुषव्यवस्था न स्यात् ।

तिङ्समानाधिकरणे युष्मदि मध्यमपुरुष, तिङ्समानाधिकरणेऽस्मदिचोत्तमपुरुषो भवति । तत्र समानाधिकरण्यं स्ववाच्यवाचकत्वसम्बन्धेन भवति । यथा चोक्तं "भिन्नप्रवृत्तिनिमित्तकानां शब्दानामेकस्मिन्नर्थे वृत्तिः समानाधिकरण्यम् इति " (दीक्षित, पृ.११) । एवञ्चाख्यातस्य कृतिवाचकत्वे तस्य युष्मच्छब्देनोक्त-समानाधिकरण्यासम्भवात् पुरुषव्यवस्थोच्छिन्ना स्यात् । नागेशोऽपि प्राह – "युष्मदस्मदोः लकारेण समानाधिकरण्याभावात् पुरुषव्यवस्थाऽनापत्तेः" इति (नागेशः, पृ.१०४) । आख्यातार्थत्वेन कृते वाचकत्वे लाघवं, कर्तृवाचकत्वे गौरवमित्यपि नादरणीयम् । न च कर्तृत्वं कृत्याश्रयत्वं भवितुमर्हति । सर्वत्राचेतनादौ तस्यासम्भवात् । यथा चोक्तं कौण्डभट्टेन – "कारकचक्रप्रयोक्तृत्वं[ञ] कृत्याश्रयत्वं वा स्वीकारे सति दण्डः करोति इत्यत्राव्याप्तम्" इति (भट्टः, पृ.५७) । तस्मात् कर्तृत्वं नाम अखण्डोपाधिरूपमेकमेवेति न च शक्यतावच्छेदकत्वेऽपि गौरवमेवेति ।

वैयाकरणस्तु फलव्यापारौ धात्वर्थौ स्वीकुर्वन्ति तथा चााख्यातार्थो भावना इत्यामनन्ति । स्वसिद्धान्तं दृढयन्-अन्यान्निराकुर्वञ्चाह दीक्षितो वैयकरणसिद्धान्तकारिकायाम् –

"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम् ॥" (भट्टः, पृ.५७)

फलव्यापारौ धातुवाच्यौ भवतः । फलाश्रयः कर्म भवति चेत् व्यापाराश्रयः कर्ता भवति । संख्या कालाश्च तिङःएव बोधयन्ति । तस्मादेवाख्यातार्थश्च कर्तृकर्मसंख्याकालाः चत्वारः सन्ति । तत्राख्यातार्थस्य कर्तुः 'चैत्रः ओदनं पचति' इत्यत्र चैत्रादिनाऽभेदेनान्वयः, फलञ्चानुकूलत्वसम्बन्धेन व्यापारे विशेषणम् । यद्यपि "प्रकृतिप्रत्ययौ सहार्थं ब्रुतस्तयोः प्रत्ययार्थस्यैव प्राधान्यम्" इति नियमस्तथापि "भावप्रधानमाख्यातं सत्वप्रधानानि नामानि" इति निरुक्तोक्तेः व्यापार मुख्यविशेष्यकः शाब्दबोधः भवतीति निश्चप्रचमेव । क्रियापदे फलव्यापारयोरुभयोरर्थयोः विद्यमानेऽपि व्यापारार्थस्यैव प्राधान्यं भवति ।

फलव्यापारौ धात्वर्थौ स्तः इति कथनस्याशयो यत् फलनिरूपितार्थप्रत्यायकशक्तिः तथा व्यापारनिरूपितार्थप्रत्यायकशक्तिश्च धातोः विद्यते । पचति इत्यादौ पच् धातोः विक्लित्यादिरूपं फलम्, फुत्कारत्वधः सन्तापनत्व-स्थालितण्डुलादिसंयोजनादिरूपो व्यापारश्चार्थः । तण्डुलादिषु परिवर्तितं रूपं पच् धातोफलमर्थः । । व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया वर्तते (भट्ट, पृ. ११-१५) । धातुवाच्यव्यापारस्तु क्रमजन्मनां व्यापाराणां समूहो वर्तते । तच्च पच् धातोः फुत्कारत्वाधःसन्तापनत्वादिरूपः वर्तते । फलाश्रयं कर्म तथा व्यापाराश्रयः कर्ता भवति । धातोः फलार्थे प्रधाने व्यापारार्थः तथा व्यापारार्थे प्रधाने फलमर्थः विशेषणं भवति (भट्ट, पृ.१९-२१) ।

अत्र वैयाकरणो नागेशस्तु फलव्यापारयोः धातोः पृथक् पृथक् शक्तिस्वीकारे तयोरुद्देश्यविधेय-भावेनान्वयापत्तिमाशङ्क्य फलार्थप्रधाने फलावच्छिन्नो व्यापारो धात्वर्थः तथा व्यापारार्थप्रधाने व्यापारावच्छिन्नं फलं धात्वर्थं स्वीकरणीयमित्याह । एतदेव स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा. सू.१।३।७२) इति सूत्रस्थस्य फलशब्दस्याशयः विद्यते इति तस्याशयः दृश्यते ।

**धातूनामनेकार्थता**

धातुपाठे धातवः गणेषु विभज्य पठिताः सन्ति । तत्र धातूनामर्थाश्च परम्परया निर्दिष्टा प्रप्यन्ते तद्यथा भू सत्तायाम्, कथ वाक्यप्रबन्धे, अञ्चू गतिपूजनयोः, अत सातत्यगमने, गम्लृ गतौ, दिवु क्रीडाविजिगिषा.. , हु दानादनयोः, चुरस्तेये, चर गतिभक्षणयोः, एध वृद्धौ इत्यादिः । एतत्सर्वं धातोः प्रधानार्थनिदर्शनमेव । अकर्मकात् भू धातोः अनु

उपसर्गयोगेऽनुभवतीति सकर्मकं क्रियापदं निष्पद्यते । ततः कर्मणि लकारोत्पत्तौ 'अनुभूयते चैत्रेण' इत्यादि वाक्यं सम्पद्यते । तच्च भूधातोरनुभवार्थे विद्यमाने एव सम्भवति । तस्मात् अनुभवार्थोऽपि भूधातोरेवार्थ स्वीक्रियते । केवलमत्रानुः उपसर्ग तदर्थस्य द्योतकः एव मन्यते । तस्मात् धातवोऽनेकार्थाः भवन्तीति मतं दृढतरं भवति । तथा चोक्तं सारस्वतव्याकरणे-

'निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः सद्भिः पाठस्तेषां निदर्शनम् ॥' (त्रिपाठी, पृ. १८७) ।

निपाताः उपसर्गाः धातवश्चानेकार्थाः भवन्ति । तेषामर्थनिर्देशनम् तु निदर्शनमात्रम् बोध्यम् । एतेन धातवोऽनेकान्नर्थान् बोधयन्ति चेति स्फुटं भवति ।

**धातोर्विभागनिरूपणम्**

गणपाठानुसारेण धातवः दशसु गणेषु विभज्य पठिताः सन्ति । कर्मग्रहणदृशा सकर्मकाकर्मकद्विकर्मकाश्च धातवः भवन्ति । व्युत्पादनदृशा धातवः, औपदेशिका आतिदेशिकाश्च भवन्ति । औपदेशिकाः धातवः दशगणेषु सम्बद्धाः धातुपाठे पठिताः सन्ति । एते मूलधातवश्च कथ्यन्ते । औपदेशिकानां धातूनां "भूवादयो धातवः" (पा.सू. १।३।१) इति सूत्रेण धातुसंज्ञा भवति । सनादिभिः प्रत्ययैः व्युत्पन्नाः धातव आतिदेशिकाः कथ्यन्ते । "सनाद्यन्ता धातवः" (पा.सू. ३।१।३२) इत्यनेन सनाद्यन्ताः समुदाया आतिदेशिकाः धातुसंज्ञकाः भवन्ति ।

धातोर्विभागनिरूपणप्रसङ्गे विविधान्नाधारान्नाधृत्य विभजनं कर्तुं शक्यते । धातोः गणानुरूपम्, व्युत्पादनानुरूपम्, कर्मग्रहणानुरूपञ्च दृष्टानां विभागानांनिरूपणं विधीयते ।

**गणपाठानुरूपः धातोर्विभागः**

गणपाठे धातवो भ्वादि-अदादि-जुहोत्यादिगणनाम्ना दशसु गणेषु विभज्य पठिता दृश्यन्ते । धातूनां पाठस्य क्रमे समानरूपायितानां धातूनां समूहं परिकल्प्य एव गणविभागश्चाप्याचार्येण पाणिनिना विहितमिति ज्ञायते । पाणिनिना धातवः तेषां प्रसिद्धार्थाश्च तत्र निर्दिष्टाः सन्ति । केचना विद्वांसस्तु पाणिनिना प्रथमः भू , एध् , हु, अद् , तुद् , तनु इत्यादिक्रमेण धातुपाठः एव निर्मितः सम्भवेत्, पश्चादन्ये वृत्तिकाराः तत्र सत्तायामित्याद्यर्थान् संयोजयामासुः इत्यपि कथयन्ति । पाणिनेः मूलधातुपाठस्येदानी-मनुपलब्धत्वाद् एतदपि सम्भवेत् । गणपाठानुसारेण धातवः दशगणेषु विभक्ताः विद्यन्ते । अयमत्र गणसङ्ग्रहः -

"भ्वाद्यदादिः जुहोत्यादिः दिवादिः स्वादिरेव च
तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः ॥" (नौटियाल, पृ.२१७)

एतेषां दशगणानां क्रमानुसारेण परिचयमत्रसमुपस्थाप्यते ।

**(क) भ्वादिगणः**

भ्वादिगणे प्रथमात् भू सत्तायाम् इति धातो आरभ्य धातुपाठो विहितो वर्तते । आद्यः भू धातो उपस्थाप्येनास्य गणस्य नामः भ्वादिगण इति जातो विलोक्यते । पाणिनिना पठितेषु धातुषु मध्येऽधिका धातवो भ्वादिगणे एव प्राप्यन्ते । सामान्यतः संस्कृतभाषायां प्रयुक्तानि क्रियापदानि भ्वादिगणस्यैव मिलितानि सन्ति । भ्वादिगणपठिताः धातवो ये परिश्रमपूर्वकं साधयन्ति ते पश्चादागतादाद्यन्यगणपठिता धातवः सरलतया एव साधयितुं ज्ञातुं च शक्नुवन्ति । अस्मिन् गणे "कर्तरि शप्" (पा.सू. ३।१।६८) इति सूत्रेण शप्प्रत्ययो भवति । भ्वादिगणपठितेषु धातुषु मध्येऽस्य सूत्रस्य महत्त्वमधिकं वर्तते । अस्मिन् गणे भू, अर्च, एध, कम्प, क्रीड्, पा, दृश्, घ्रा, गम्, गुप्, चल्, त्यज्, पा, दृश, वृत् श्रिञ्, भज, पचादयो धातवः सन्ति ।

भ्वादिगणपठितात् धातोः शप् (अ) विकरणप्रत्ययो भवति । तथा च शप्-विकरणप्रत्ययः सर्वेभ्यः धातुभ्यो भवति । एतदपवादत्वेन प्रबाध्यान्यगणपठितेभ्यः धातुभ्यः श्यन्, श्नु, शः, श्नम्, श्नादयो अन्ये विकरणप्रत्यया उपस्थाप्यन्ते । गणपाठरहितेभ्यः विविधार्थप्रकटनाय निर्मितेभ्यः णिच्सन्यङादिभिः प्रत्ययैः व्युत्पन्नेभ्यः धातुभ्यश्च शप्-विकरणप्रत्यय एव भवति । अतः शप् गणरहितः साधारणविकरणप्रत्ययो वर्तत इति ज्ञायते ।

**(ख) अदादिगणः**

अस्मिन् गणे प्रथमम् अद भक्षणे इति धातोः पाठः विद्यते । आद्यस्य अद धातो उपस्थाप्येनास्य गणस्य नाम अदादिगणः कथितो विलोक्यते । पाणिनिना पठितेषु दशगणेषु मध्ये द्वितीयो गण अदादिर्वर्तते । अस्मिन् गणे धातोः तिङ्प्रत्ययानाञ्च मध्ये "कर्तरि शप्" (पा० सू ३।१।६८) इत्यनेन शप् (अ) विकरणप्रत्ययो भवति, तदनन्तरं "अदिप्रभृतिभ्यः शपः" (पा.सू. २।४।७२) इत्यनेन शप्प्रत्ययस्य लुक् भवति । अदादिगणपठितात् धातोः शप्प्रत्ययस्य लुगेव भ्वादिगणतो भिन्नं कार्यं मुख्यरूपेण दृश्यते । अत्र अद्, विद्, रूद्, या, शीङ, हन्, अस्, ब्रूञादयो धातवः सन्ति ।

**(ग) जुहोत्यादिगणः**

अस्मिन् गणे प्रथमः हु दानादनयोः धातोः पाठोऽस्ति । आद्यस्य हु धातोः लटि जुहोति इति रूपं भवति, तादृशेन प्रकारेण रूपायितानां धातूनामेकत्र उपस्थाप्येनास्य गणस्य नाम जुहोत्यादिगणः कथ्यते । अत्र प्रथमतः हु धातोः पठनेन भ्वादिगण इत्यादिवत् हुत्यादिगण इति किम् न कथितम् ? इत्याशङ्का मा भूत् । अत्र "जुहोत्यादिभ्यः श्लुः" (पा.सू. २।४।७५) इति सूत्रेण धातोर्द्वित्वे जुहोति रूपं सिध्यति । अस्मिन् प्रकरणे धातोर्द्वित्वादिकार्याणि मुख्यरूपेण विहितानि दृश्यन्ते । तस्मादत्र जुहोत्यादिगणः इति नाम्नः सार्थक्यं विलोक्यते । अत्र हु, भृञ्, भी, डुदाञ्, णिजिरादयो धातवः सन्ति । जुहोति सदृशरूपात्मकाः धातवो ऽस्मिन् गणे समायान्ति ।

**(घ) दिवादिगणः**

अस्मिन् गणे प्रथमः दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु इति धातोः पाठो ऽस्ति । आद्यः दिवु धातो उपस्थाप्येनास्य गणस्य नाम दिवादिगणः कथ्यते । पाणिनिना पठितेषु दशगणमध्येषु चतुर्थगणः दिवादिगणो ऽस्ति । अस्मिन् गणे "दिवादिभ्यः श्यन्" (पा.सू. ३।१।६९) इत्यनेन धातोः तिङ्प्रत्ययस्य च मध्ये श्यन् विकरणप्रत्ययो भवति । अत्र दिव्, दीङ, नृत्, कुप्, जनादय धातवः सन्ति ।

**(ङ) स्वादिगणः**

अस्मिन् गणे प्रथमः षुञ् अभिषवे इति धातोः पाठो ऽस्ति । आद्यः षुञ् धातो उपस्थाप्येनास्य गणनाम स्वादिगण इति कथ्यते । पाणिनिना पठितेषु धातुप्रकरणमध्येषु पञ्चमगणः स्वादिगणो ऽस्ति । अस्मिन् प्रकरणे "स्वादिभ्यः श्नुः" (पा.सू. ३।१।७३) इति सूत्रेण श्नुप्रत्ययो भवति । अत्र षुञ्, चिञ्, स्तृञ्, लूञ्, पूञ्, धूञादयो धातवः सन्ति ।

**(च) तुदादिगणः**

अस्मिन् गणे प्रथमतः तुद व्यथने इति धातोः पाठो ऽस्ति । आद्यः तुद धातोरूपस्थाप्येनास्य गणनाम तुदादिगण इति कथ्यते । पाणिनिना पठितेषु दशगणधातुप्रकरणमध्येषु षष्ठगणः तुदादिगण अस्ति । अस्मिन् प्रकरणे पठितानां धातूनां रूपाणि तुद् धातुवत् भवन्ति । अत्र "तुदादिभ्यः शः" (पा.सू. ३।१।७७) इत्यनेन शप्रत्ययो भवति । तुदादिगणे तुद्, भ्रस्ज, मोच्लृ, षिचादय धातवः सन्ति ।

**(छ) रुधादिगणः**

अस्मिन् प्रकरणे प्रथमतः रुधिर् आवरणे इति धातोः पाठो ऽस्ति । आद्यः रुध् धातोरुपस्थाप्येनास्य गणस्य नाम रुधादिगण इति कथ्यते । अत्र इर्-भागस्य "इर इत्संज्ञा वाच्या" इति वार्तिकेन इत्संज्ञा भवति । पाणिनिना पठितेषु दशगणेषु धातुप्रकरणमध्येषु सप्तमगणो रुधादिगणो वर्तते । अस्मिन् प्रकरणे पठितानां धातूनां रूपाणि रुध् धातुवत् भवन्ति । अत्र "रुधादिभ्यः श्नम्" (पा.सू. ३।१।७८) इत्यनेन श्नम्-प्रत्ययो भवति । रुधादिगणे रुध्, युज्, भुजादय धातवः सन्ति ।

**(ज) तनादिगणः**

अस्मिन् प्रकरणे प्रथमतः तनु विस्तारे इति धातोः पाठो ऽस्ति । आद्यः तन् धातोरुपस्थाप्येनास्य गणस्य नाम तनादिगण इति कथ्यते । पाणिनिना पठितेषु दशगणधातुप्रकरणमध्येषु अष्टमगणस्तनादिगणो ऽस्ति । अस्मिन् प्रकरणे "तनादिकृञ्भ्य उः" (पा.सू. ३।१।७९) इत्यनेन उ-प्रत्ययो निष्पद्यते । अस्मिन् प्रकरणे पठितानां धातुनां तन् धातुवत् रूपाणि भवन्ति । अत्र तन्, डुकृञ्, क्षणादयो धातवः सन्ति ।

**(झ) क्र्यादिगणः**

अस्मिन् प्रकरणे प्रथमतः डुक्रीञ् द्रव्यविनिमये इति धातोः पाठो ऽस्ति । आद्यः क्रीञ्-धातो उपस्थाप्येनास्य गणनाम क्र्यादिगणः कथ्यते । पाणिनिना पठितेषु दशगणधातुप्रकरणमध्येषु नवमगणः वर्तते ।अस्मिन् गणे "क्र्यादिभ्यः श्ना" (३।१।८१) इति सूत्रेण श्ना-प्रत्ययो भवति । अत्र पठितानां धातूनां रूपाणि क्रीधातुवत् निष्पद्यन्ते ।

**(ञ) चुरादिगणः**

चुरादिगणे प्रथमतः चुर स्तेये इति धातोः धातुपाठः आरभ्यते । आद्यः चुर्धातो उपस्थाप्येनास्य गणनाम चुरादिगणः कथ्यते । पाणिनिना पठितेषु दशगणधातुप्रकरणमध्येषु दशमगणः चुरादिगणो ऽस्ति । चुरादिगणपठितेभ्यः धातुभ्यः "सत्यापपाशरूपवीणातूलश्लोकसेनालोम-त्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्" (पा.सू. ३।१।२५) इति सूत्रेण धातोः लकारस्य च मध्ये णिच् (इ) प्रत्ययो भवति । ततः तस्य सनाद्यन्ताः धातव इति धातुसंज्ञायां लकारा उत्पद्यन्ते । अस्मिन् गणे शप् विकरणप्रत्ययो भवति । अस्मिन् प्रकरणे पठितानां धातूनां रूपाणि चुर्धातुवत् निष्पद्यन्ते । चुर्, चिन्त्, पूज्, पाल्, चित्र्, मन्त्र्, भक्ष् कथ् इत्यादयः धातवः चुरादिगणे पठिताः सन्ति ।

**कर्मग्रहणानुरूपः धातोर्विभागः**

सकर्मकाकर्मकरूपेणापि धातवो द्विधा विभज्यन्ते । विद्यमानं कर्म यस्य स सकर्मकः भवति । अविद्यमानं कर्म यस्येत्यकर्मकः कथ्यते । "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" इत्यनेन बहुव्रीहिसमासे विद्यमानशब्दस्य लोपेन सकर्मकाकर्मकशब्दे निष्पन्ने स्त । तत्र सामान्येन फलव्यापारव्यधिकरणवाचकत्वं सकर्मकत्वं यथा गम्पठ्खादित्यादयः । फलव्यापारसमानाद्याकरणमकर्मकत्वमिति । यथा भ्वेद्यहस्शीङ् इत्यादयः । एतावता येषां धातूनां कर्मसम्भवति ते सकर्मकाः भवन्ति चेद्येषामसम्भव तेऽकर्मकाः भवन्ति । यथा खाद्धातोः तृप्तिरूपफलं खाद्येऽस्ति चेद्गलविलादधःसंयोगानुरूपव्यापारः कर्तरि भवति । इत्थं फलव्यापारयोर्भिन्नाश्रयत्वात् खाद् धातोः सकर्मकत्वम् सिध्यति । एतेन च सकर्मकाकर्मकरूपेण च धातोः विभागः सुस्पष्टं परिलक्ष्यते ।

**सकर्मका धातवः**

कर्मसहिता धातवः सकर्मकाः सन्ति । सकर्मकत्वञ्च फलव्यधिकरणव्यापारवाचकत्वं वर्तते । यस्यार्थस्य कर्मसंज्ञा भवति तस्यार्थेन सह धात्वर्थस्यान्वयो भवति, स धातुः सकर्मको भवति। धात्वर्थयोः फलव्यापारयोः भिन्नाश्रये भिन्ननिष्ठतायां वा धातुः सकर्मकः भवति । तथा चोक्तम् -

"फलव्यापारयोरेकनिष्ठतायामकर्मकः

धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥" (भट्टः, पृ.१०४) ।

यथा गम-पठ्-पच्-दृश्-पा-प्रच्छादयः । उदाहरणं यथा बालकः पाठं पठति । अत्र फलव्यापारयोः भिन्नत्वेन पठ्धातुः सकर्मक इति । अत्र पाठशब्दस्य कर्मसंज्ञा भवति तस्यार्थेन सह पठ्धात्वर्थस्यान्वयो जायते । तस्मात् कारणात् पठ्धातुः सकर्मक इति ज्ञायते ।

**द्विकर्मकाः धातवः**

दुह्याच्पच्दण्ड्चिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्निहृकृष्वहाम् ॥ (दीक्षितः, भाग १, पृ.२७३)

दुह्, याच्, पच् इत्यादय द्वादशाः धातवोऽकथितकर्मयुक्ताः सन्ति । एते प्रसिद्धं कर्म तथाप्रसिद्धमकथितं कर्मपदं च गृह्णीतः । तस्मादेते दुह्, याच्, पच् इत्यादय द्वादशाः धातवस्तथा सकर्मकधातुभिः निर्मिताः णिजन्ता धातवश्च द्विकर्मकाः भवन्ति । एते द्वे कर्मपदे गृह्णीतः । तस्मात् द्विकर्मका उच्यन्ते । एते च सकर्मकभेदा एव ।

**अकर्मकाः धातवः**

येषां धातूनां कर्म न सम्भवति तेऽकर्मकाः धातवः सन्ति । फलसमानाधिकरण-व्यापारवाचकत्वमकर्मकत्वं वर्तते । धात्वर्थफलव्यापारयोः एकनिष्ठतायामेकाश्रये वा धातुरकर्मको भवति (भट्टः, १९८७ : पृ.१०४) । अर्थात् फलव्यापारौ यत्र एकैव स्थाने तिष्ठतश्चेत् सोऽकर्मकः धातुरिति कथ्यते । यथा- भू-एध्-हस्-रुद्-नृतादयः । उदाहरणं यथा- रामः हसति । अत्र धात्वर्थयोः फलव्यापारयोः अभिन्नत्वेन हस् धातुरकर्मक इति ज्ञायते ।

यथा- बालकः नृत्यति । नृत्यतीत्यत्र फलव्यापारसमानाधिकरणवाचकत्वेन नृधातुरकर्मक इति ज्ञायते ॥
अकर्मकधातूनां परिगणनप्रसङ्गे श्लोकोऽयं प्रसिद्धो वर्तते-

"लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।
नर्तन-निद्रा-रोदन-वासाः स्पर्धा-कम्पन-मोदन-हासाः ।
शयनक्रीडारुचिदीप्त्यर्थाः धातव एते कर्मणि नोक्ताः।" इति (नौटियालः,१९८८ : पृ.२१७)
लज्जा, सत्ता, जागृतिः, वृद्धिः, क्षयाद्यर्थाभिधायकाः धातवोऽकर्मकाः भवन्ति ।

क्वचिदर्थान्तराच्च सकर्मकाः धातवोऽकर्मकाः तथाकर्मकाश्च सकर्मकाः भवितुं शक्नुवन्ति । तथा चोक्तम् वैयाकरणसिद्धान्तकौमुद्याम्-

"धातोरर्थान्तरे वृत्तेः धात्वर्थेनोपसंग्रहात्
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥"(दीक्षित, पृ.८०, भाग-४)

यदा धातुः स्वं प्रसिद्धमर्थं विहायान्यदर्थं प्रकटयति तदा सः धातुरकर्मको भवति । यथा नदी वहति । यद्यपि भृत्यः भारं वहति इत्यर्थे वह् धातुः सकर्मकस्तथापि तमर्थं विहाय नदी वहति इत्यत्र स्यन्दनार्थे प्रयुक्तः, तस्मदत्र सोऽकर्मको भवति । नरः जीवति, बालिका नृत्यति इत्यादौ प्राणधारण-गात्रविक्षेपणरूपकर्मणः विद्यमानेऽपि धात्वर्थेनैव तस्य सङ्ग्रहात् जीव् तथा नृत् धातू अकर्मकौ भवतः ।

कर्मणः प्रसिद्धेश्च धातुरकर्मको भवति । रुधिरं वर्षति, शरान् वर्षति इत्यादौ सकर्मकः वृष् धातुः मेघस्य जलरूपकर्मणः प्रसिद्धत्वात् मेघो वर्षति इत्यत्राकर्मको भवति । एतेन धातोरर्थ-परिवर्तने सति तेषां कर्मकता च विपरिणमयितुं सम्भवतीति स्पष्टं भवति ।

**व्युत्पादनानुरूपः धातोर्विभागः ।**

व्युत्पादनदृशा धातोविभागः शास्त्रकारैः प्रकल्पितः दृश्यते । धातुं मूलव्युत्पन्नभेदेन द्विधा विभक्तुं शक्यते । यः विभक्तुं न शक्यते स मूलः कथ्यते । पूर्वोक्तेषु दशगणेषूवदिष्टाः धातुपाठे पठिताः धातवः मूलधातवः सन्ति । मूलधातोः प्रातिपदिकात् वा विशेष-प्रत्ययमाध्यमेन विशेषार्थप्रकटनाय निर्मितः धातुः व्युत्पन्नो निगद्यते ।

**मूलधातवः**

ये धातवः पाणिनीय-धातुपाठे दशगणेषु सम्मिल्य वान्यस्मिन् धातुपाठे धातुत्वेन पठिताः सन्ति, ते धातुरिति नाम्नैव प्रसिद्धाः सन्ति । धातवो ऽत्र क्रियापरकार्थभिव्यञ्जनाय परम्परया एव प्रचलिताः सन्ति । एतादृशाः धातवो धातुपाठे उपदिष्टाः लभ्यन्ते । तस्मादेते मूलधातवोऽथवाव्युत्पन्ना धातवः सन्ति । धातुपाठे उपदिष्टत्वेन चैते औपदेशिकाश्च कथ्यन्ते । भ्वादि-अदादिप्रभृतिषु पूर्वोक्तेषु दशगणेषु पठिताः धातवो मूलधातवो निगद्यन्ते । मूलधातून् "भूवादयो धातवः" (पा० सू १।३।१) इति सूत्रेण धातुसंज्ञा विधीयते । भू, अद्, हु, तन्, दिव्, तुद्, रुध्, चुरादयः क्रियावाचिनः मूलधातवः सन्ति ।

**व्युत्पन्नाः धातवः**

मूलधातोः णिच्सन्यङादिविशेषप्रत्ययमाध्यमेन विशेषार्थप्रकटनाय निर्मितः धातु व्युत्पन्नो निगद्यते ।

प्रातिपदिकाच्च विशेषक्रियापरकार्थप्रकटनाय प्रत्ययाः विधीयन्ते । प्रादिपदिकै व्युत्पादिताः धातवः नामधातवः निगद्यन्ते । एतादृशैः विविधप्रत्ययैः साधिताः विशेषार्थप्रत्यायका धातवो व्युत्पन्ना धातवः कथ्यन्ते । यः धातुः प्रकृतिप्रत्ययरूपेण विभक्तुं शक्यते सः धातुः व्युत्पन्नधातुरिति कथितुं शक्यते । व्युत्पन्नान् धातून् "सनाद्यन्ताः धातवः" (पा.सू. ३।१।३२) इति सूत्रेण धातुसंज्ञा करोति । एते चातिदेशिका धातवः मन्यन्ते । सनादयः प्रत्यययाः आदौ येषां ते सनाद्यन्ताः सन्ति । सनादिप्रत्ययान्ताः धातवः व्युत्पन्ना धातवः सन्ति । धातुतः तथा नाम सर्वनाम-विशेषणतः धातुत्वव्युत्पादकाः एते द्वादश प्रत्ययाः सनादयः कथ्यन्ते -

सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ तथा ।

यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः ॥ (दीक्षितः, पृ.७१)

सन्, क्यच्, काम्यच्, क्यङ्, क्यष्, क्विप्, णिङ्, ईयङ्, णिच्, यक्, आय, यङ्, एते द्वादशः सनादयः प्रत्ययाः सन्ति । एते प्रत्यया मूलधातुं प्रातिपदिकं वा धातुत्वेन व्युत्पादयन्ति । तालिकायां दिङ्मात्रमेतेषामुदाहरणमत्र प्रस्तूयते -

| क्र.सं. | प्रत्ययः | प्रत्ययविधायकं सूत्रम् | व्युत्पन्नः धातुः | प्रत्ययान्तम् रूपम् |
|---|---|---|---|---|
| १. | सन् | धातोः समानकर्तृकादिच्छायां वा (पा.सू.३।१।७) | पिपठिष | पिपठिषति, जुगुप्सते |
| २. | क्यच् | सुप आत्मनः क्यच् (पा.सू.३।१।८) | पुत्रीय | पुत्रीयति |
| ३. | काम्यच् | काम्यच्च (पा.सू.३।१।९) | पुत्रकाम्य | पुत्रकाम्यति |
| ४. | क्यङ् | कर्तुः क्यङ् सलोपश्च (पा.सू.३।१।११) | कृष्णाय | कृष्णायते, श्येनायते |

| | | | | |
|---|---|---|---|---|
| ५. | क्यष् | लोहितादिडाज्भ्यः क्यष् (पा.सू.३।१।१३) | लोहिताय | लोहितायते |
| ६. | आचारार्थ क्विप् | सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः(वार्तिकं) | कृष्ण | कृष्णति |
| ७. | णिच् | हेतुमति च (पा.सू. ३।१।२६) | पाठि | पाठयति |
| ८. | यङ् | धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (पा.सू.३।१।२२) | बोभूय | बोभूयते |
| ९. | यक् | कण्वादिभ्यो यक् (स्वार्थे) (पा.सू.३।१।२७) | कण्डूय | कण्डूयति |
| १०. | आय | गुपूधूपविच्छिपणिपनिभ्य आयः (३।१।२८) | गोपाय | गोपायति |
| ११. | ईयङ् | ऋतेरीयङ् (पा.सू. (पा.सू. ३।१।२९) | ऋतीय | ऋतीयते |
| १२. | णिङ् | कमेर्णिङ् (स्वार्थे) (पा.सू. ३।१।३०) | कामि | कामयते |

णिच् सन् यङ् आय् इयङ् णिङ् एते प्रत्ययाः धातोरव विधीयन्ते तथैते धातुमेव व्युत्पादयन्ति । यक् क्विप् क्यष् क्यङ् क्याच् काम्यच् एते प्रत्ययाः प्रातिपदिकेभ्यः विधीयन्ते । एते प्रातिपदिकं क्रियात्मकार्थप्रतिपादनाय धातुत्वमापयन्ति । तस्मादेते सनादयः प्रत्ययाः केचनाः धातुभ्यः तथा केचनाः प्रातिपदिकेभ्यश्च विहिताः दृश्यन्ते परन्त्वेते सर्वे मूलं धातुत्वमापयन्ति । धातुत्वे सत्येते क्रियात्मकमर्थं बोधयन्ति । ततस्तेभ्यः तिङ्प्रत्ययसंयोजनेन क्रियापदस्य रचना भवति ।

**इडागमाधारेण धातोर्विभागः**

धातोः परस्य वलादिस्थस्यार्धधातुकप्रत्ययस्य 'आर्धधातुकस्येड्वलादेः' (पा.सू. ७।२।३५) सूत्रेण इडागमः विधीयते । इडागमेन सहितः धातुः सेट् निगद्यते । यो धातुः वलादावार्धधातुके प्रत्यये परे इडागमं न लभते सोऽनिट् निगद्यते । अयं सेडनिट् रूपकः धातोर्विभागः सूक्ष्मतरः वर्तते । इडागमं नाम धातोः रूपायनसन्दर्भे इकारस्य प्रश्लेषणसम्बद्धो नियमः वर्तते । तस्मात् सर्वे धातवोऽस्य विभागस्य फलभाजः भवन्ति । सामान्यतो ऽत्रास्य विभागस्य चर्चामात्रं विधीयते ।

**सेटः धातवः**

वलादावार्धधातुके प्रत्यये परे ये धातवः रूपायनसन्दर्भे इकारस्य प्रश्लेषणमापनुवन्ति ते धातवः सेटः निगद्यन्ते । यः वलादिस्थस्यार्धधातुकप्रत्ययस्य 'आर्धधातुकस्येड्वलादेः' (पा.सू. ७।२।३५) सूत्रेण इडागमः विधीयते सः इडागमेन सहितः धातुः सेट् निगद्यते । यथा - पठ् धातोः लुटि पठिता, भू धातोः भविता, एध् धातोः एधिता (एवमेव एधिष्यति भविष्यति पठिष्यति) इत्यादयः धातवः सेटः सन्ति ।

**अनिटः धातवः**

यो धातुः वलादावार्धधातुके प्रत्यये परे इडागमं न लभते सोऽनिट् निगद्यते । प्राप्ते इडागने सति एकाच उपदेशेनुदात्तात् (पा.सूं.७.२.१०) सूत्रेण इडागमस्य निषेधो भवति । तस्मादेतेषां धातूनां रूपायनसन्दर्भे इडागमः वा इकारस्य प्रश्लेषणं न सम्पद्यते । उपदेशावस्थायां यो धातुः एकाच्, अनुदात्तश्च वर्तते सः वलादावार्धधातुके प्रत्यये परे इट्कार्यं न लभन्ते । तद्यथा - हन् धातोः लुटि हन्ता, गम् धातोः गन्ता, दा धातोः दाता, पा धातोः पाता, नी धातोः नेता, लभ् धातोः लब्धा, कृ धातोः कर्ता इत्यादयः । उपदेशावस्थायां यो धातुःएकाज् भवति तत्तु स्पष्टमेव परन्तु के ऽनुदात्ताः धातवः सन्तीति विषयं वैयाकरणसिद्धानतकौमुदी ग्रन्थस्य कारिकेयं स्पष्टयति -

ऊदृदन्तैर्यौति रुक्ष्णशीङ्स्नु नुक्षु श्विडिङ्श्रिभिः ।
वृङ् वृञ्भ्याञ्च विनैकाचोऽ जन्तेषु निहताः स्मृताः ॥ (दीक्षितः, पृ.४१, (भाग ३)

ऊकारान्ताः ॠकारान्ताः यु रु क्ष्णु शीङ् स्नु नु क्षु श्वि डिङ् श्रि वृङ् वृञ् एतान् धातून् विहायान्ये शेषाः अजन्ताः धातवोऽनुदाताः सन्ति । एते तु उदात्ता एव सन्ति । अनुदात्ताः धातवः वलादावार्धधातुके इडागमं नाप्नुवन्ति । एषोऽजन्तधातुविषयकः नियमः । सन्त्यनेके हलन्ताः धातवश्च ते चात्र परिगणिताः सन्ति । हलन्ताः कान्तेषु चान्तेषु दान्तेषु पान्तेषु रान्तेषु शान्तेषु षान्तेषु हान्तेषु च परिगणिताः द्व्यधिकं शतं धातवः अनुदात्ताः उपदिष्टाः सन्ति ।

**प्रत्ययोत्पत्त्यनुरूपः धातोर्विभागः**

लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एते दशलकाराः सन्ति । एते धातोः लः कर्मणि चाभावे चाकर्मकेभ्यः (पा.सू. ३।४।६९) सूत्रेण सकर्मकाद्धातोः कर्तरि कर्मणि च तथाकर्मकाद्धातोः कर्तरि भावे च विधीयन्ते । एतेषां दशलकाराणां स्थाने तिबादयोऽष्टादश तिङः आदिश्यन्ते । एते तिङः तिङ्प्रत्ययनाम्ना च ज्ञायन्ते । एते तिङः परस्मैपदिनः आत्मनेपदिनश्च भवन्ति । ते चात्र पुरुषवचनक्रमेण तालिकायां निर्दिश्यन्ते -

**परस्मैपदिनः तिङ्प्रत्ययाः**

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः | तिप् | तस् | झि |
| मध्यमः | सिप् | थस् | थ |
| उत्तमः | मिप् | वस् | मस् |

**आत्मनेपदिनः तिङ्प्रत्ययाः**

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः | त | आताम् | झ |
| मध्यमः | थास् | आथाम् | ध्वम् |
| उत्तमः | इड् | वहि | महिङ् |

येभ्यः धातुभ्यः परस्मैपदिनः तिङः भवन्ति ते परिस्मैपदिनः सन्ति । येभ्यः धातुभ्यः आत्मनेपदिनः तिङः भवन्ति ते आत्मनेपदिनः धातवः कथ्यन्ते । येभ्यः धातुभ्यः परस्मैपदिनः तिङः तथा चात्मनेपदिनश्च भवन्ति ते धातवः उभयपदिनः निगद्यन्ते । तस्मात् तिङ्प्रत्ययोत्पत्तिभेदेनापि आत्मनेपदी, परस्मैपदी, उभयपदी चेति त्रिधा विभक्तः दृश्यते ।

**आत्मनेपदिनः धातवः**

येभ्यः धातुभ्यः आत्मनेपदिनः तिङ्प्रत्ययाः (त आताम् झ...) भवन्ति ते धातवः आत्मनेपदिनः निगद्यन्ते । यस्माद्धातोः केवलमात्मनेपदीयाः तिङ्प्रत्यया उत्पद्यन्ते स आत्मनेपदी वर्तते । यथा एधरभलभेत्यादयः । यस्य धातोरनुदात्तस्याचः ङकारस्य वा इत्संज्ञा भवति तस्मादात्मनेपदप्रत्यया एव भवन्ति (अनुदात्तङित आत्मनेपदम् (पा.सू. १।३।१२) । यथा-एध लभ वृतु रभ जनि इत्यादयः धातवोऽनुदात्तेतः सन्ति । अतः एते आत्मनेपदिन धातवः सन्ति । शीङ् डीङ चक्षिङ् वृङ् इत्यादयः ङकारस्येतः धातवः सन्ति । तस्मादेतेभ्योऽपि आत्मनेपदिन एव तिङः उत्पद्यन्ते । तस्मादेतेऽप्यात्मनेपदिनः धातवः सन्ति । क्रियायाः बारम्बारता तथातिशयार्थकबोधकस्य यङन्तस्य धातोः तथा च भाववाच्यस्य तथा कर्मवाच्यस्य च क्रियापदानि सदैवात्मनेपदीयान्येव भवन्ति ।

**परस्मैपदिनः धातवः**

आत्मनेपदस्य निमित्तेन (अनुदात्तेतः ङितश्च रहितात्) हीनाद्धातोः परस्मैपदम् भवति (शेषात्कर्तरि परस्मैपदम् (पा.सू. १।३।७८) । पूर्वोक्तेभ्यः आत्मनेपदलक्षणरहिताद्धातोः परस्मैपदिनः एव तिङ्प्रत्ययाः (तिप् तस् झि...) जायन्ते । तस्मादेतादृशाः धातवः परस्मैपदिनः निगद्यन्ते । यथा - भू पठ् गम् दृशिर् पा खेल् इत्यादयः धातवः परस्मैपदिनः सन्ति ।

**उभयपदिनः धातवः**

येभ्यः धातुभ्यः परस्मैपदीयाः तथात्मनेपदीयाश्च तिङ्प्रत्ययाः उत्पद्यन्ते ते उभयपदिनः धातवः सन्ति । उभयपदीनां धातोः रूपाणि परस्मैपदीयानि तथात्मनेपदीयानि च भवन्ति । यस्य धातोः स्वरितस्वरस्येत्संज्ञा भवति तथा ञ्कारस्य वेत्संज्ञा भवति तस्माद्धातोः कर्तृगामिनि क्रियाफले सति आत्मनेपदिनस्तथा तदभावे परस्मैपदिनः तिङ्प्रत्ययाः उत्पद्यन्ते (स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा.सू. १।३।७२)। तस्मादेतादृशाणां धातूनां रूपाणि परस्मैपदे तथात्मनेपदे चोपलभ्यन्ते । तस्मादेतादृशाः धातवः उभयपदिनः मन्यन्ते । पच्, (पचति-पचते) श्रिञ् श्रयति-श्रयते) कृ (डुकृञ्) (करोति- कुरुते) भुज् दा, रुधिर् इत्यादयः उभयपदिनः धातवः सन्ति । णिजन्ताः धातवश्चोभयपदिनः भवन्ति ।

**निष्कर्षः**

धातुरिति प्रसिद्धः भाषातत्वविशेषः नहि केवलं क्रियापदनांमपि तु सर्वेषामेव पदानामाधारभूतः परिपोषकः बीजरूपः वर्तते । धातवः क्रियात्मकान्ननेकान् भावान् गमयन्ति । मीमांसकाः धातूनां फलमेवार्थस्तथा प्राचीननैयायिकाः व्यापारार्थ एव तथैव नव्यनैयायिकाः फलव्यापारावुभौ धात्वर्थमामनन्ति । वैयाकरणास्तु फलव्यापारावेव धात्वर्थं निश्चयन्ति । पच् धातोः फलं विक्लित्यादिः व्यापारश्च फुत्कारत्वस्थाल्यधःसन्तापनत्वादिरूपो द्व्यर्थः भवति । फलमात्रस्य व्यापारमात्रस्य वा धात्वर्थस्वीकारे सत्यनेके दोषाः समापतन्ति । तथा कृते सति धातोः सकर्मकताकर्मकताव्यस्था चोच्छिद्येत । फलार्थप्रधाने सति व्यापारः तथा व्यापारार्थप्रधाने सति फलमर्थः विशेषणं भवति । तस्मात् धातोः फलविशिष्टे व्यापारे वा व्यापारविशिष्टे फले व शक्तिरस्तीति (अर्थबोधनक्षमता) स्पष्टं भवति ।

धातूनां विविधान्नाधारान्नाधृत्य विभागः कर्तुं शक्यते । कार्यवशात् शास्त्रेषु धातोरनेके विभागाः परिकल्पिताः दृश्यन्ते । पाणिनिना समानरूपौपायिकाः धातवः समूहीकृत्य गणरूपेण पठिताः दशगणाः धातोः गणानुरूपं विभागं बोधयन्ति । एते चाद्यधातोः नाम्नैव स्थापिताः भ्वाद्यदादिजुहोत्यादिदिवादि-तनादिक्र्यादिस्वादिचुरादयः दशः गणाः सन्ति । ये धातवः कर्मपदं गृहणन्ति ते सकर्मकास्तथा ये च न गृह्णन्ति तेचाकर्मकाः सन्ति । कर्मग्रहणदृशा च धातोः सकर्मकाकर्मकः विभागः शास्त्रेषु व्यवहृतः समुपलभ्यते । रूपायन सन्दर्भे इडागमसहितेन रूपायितः सेट् तथा तद्ररहितः अनिट् इति धातोः विभागश्च कृतो विलोक्यते । येभ्यः धातुभ्यः परस्मैदिनः तिङ्प्रत्ययाः भवन्त ते परस्मैपदिनस्तथा येभ्यः आत्मनेपदिनः तिङ्प्रत्ययाः उत्पद्यन्ते ते चात्मनेपदिनः धातुरूपेण विभक्ताः विद्यन्ते । येभ्यः परस्मैपदिनस्तथात्मनेपदिनश्चोभयविधः तिङः जायन्ते ते च धातवः उभयपदिनः मन्यन्ते । एतेन धातोः विभागः विविधकार्यसम्पादनायावश्यकतानुसारं विहितमनुमीयते । वैयाकरणनिकाये भाषातत्वविदां सदसि धातोस्तथा धात्वर्थस्य धातोः विभागस्य च महत्वपूर्णं स्थानमस्तीत्यवगम्यते ।

**सन्दर्भसामग्रीणः**


अग्रवालो वासुदेवः, (ई.सं.२०१४) *पाणिनिकालीनभारतवर्षम्,* दिल्ली : चौखम्बाविद्याभवनम् ।

गौडः, डा.अशोकचन्द्रः शास्त्री (२०५५), *व्याकरण शास्त्रका इतिहास,* वाराणसी : मोतीलाल बनारसीदासः ।

गौतमः, दीपेन्द्रः (२०७४), *श्रीविष्णुव्रतामृतमहाकाव्ये प्रयुक्तानां क्रियापदानां साधुत्वानुशीलनम्,* (अप्रकाशितम् शोधप्रत्रम्) धरान : नेपालसंस्कृतविश्वविद्यालयः पिण्डेश्वरविद्यापीठम् ।

झा, मदनमोहनः (२०७३), *धातुरूपमाला,* मुम्मई : यन्त्रकोशप्रकाशनम्.

त्रिपाठी, डा.हरिश्चन्द्रमणि (२०४६), *निपातार्थनिर्णयः* : वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

दीक्षितो, भट्टोजीः (२०५९) *वैयाकरण सिद्धान्तकौमुदी,* (व्या.बालकृष्ण पञ्चोली) हिन्दी व्याख्या,: वाराणसी : चौखम्बा संस्कृतसंस्थानम् । (भागाः १,३) ।

दीक्षितो, भट्टोजीः (२०६१) *वैयाकरण-सिद्धान्तकौमुदी (*च.सं.),(भागाः १,२,३,४) बालमनोरमा-तत्त्वबोधिनीसहिता, वाराणसी : चौखम्बासुरभारतीप्रकाशनम् ।

द्विवेदी, कपिलदेवः (ई.सं.२००८) *अर्थविज्ञान और व्याकरणदर्शन,* वाराणसी : विश्वविद्यालयप्रकाशनम्।

नौटियाल, चक्रधरहंसः (ई.सं. १९८८) *बृहत् अनुवाद चन्द्रिका* (अष्टमसंस्करणम् मोतीलाल बनारसीदासः ।

पतञ्जलिः, (२०७०),*महाभाष्यम्,* (व्या.जयशंकरलालत्रिपाठी) वाराणसी : चौखम्बासंस्कृतभवनम् ।

पतञ्जलिः, (ई.सं.१९८७), *महाभाष्यम्* , (व्या.भार्गवः शास्त्री ) वाराणसी : चौखम्बासंस्कृत-प्रतिष्ठानम् ।

पाणिनिः, (ई.सं.२००६), *अष्टाध्यायी, दिल्ली :* चौखम्बा ओरियन्टालिया ।

पाण्डेयः, रामाज्ञा (२०३५), *व्याकरणदर्शनप्रतिमा,* सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।.

भट्टः, कौण्डः (२००४), *वैयाकरणभूषणसारः* (व्या.बालकृष्ण पञ्चोली), मेरठ : आदर्श ग्रन्थमाला प्रकाशनम् ।

भट्टः, नागेशः (२०७२), *लघुशब्देन्दुशेखरः,* (सम्पा० हरिनारायण तिवारी) चौखम्बा-विद्याभवनम् ।

भट्टः, नागेशः (२०७०), *लघुशब्देन्दुशेखरः,* (व्या० ब्रह्मदत्तद्विवेदी), वाराणसी : चौखम्बा संस्कृतसिरीज. ।

भट्ट,: नागेशः(२०४५), *वैयाकरणसिद्धान्तपरमलघुमञ्जुषा,* (व्या० लोकमणि दाहालः), वाराणसी : चौखम्बा सुरभारती प्रकाशन. ।

भट्टराईः, घटराजः(२०५५), *संस्कृतका अमर साहित्यकार,* काठमाण्डौ : साझा प्रकाशनम् ।

भर्तृहरिः (२०१६), *वाक्यपदीयम्,* (सम्पा.)डा.शिवशंकर अवस्थी, वाराणसी : चौखम्बा विद्याभवनम् ।

मीमांसको, युधिष्ठिरः (२०२०), *व्याकरण शास्त्रका इतिहास,* अजमेर : रामलाल कपुर ट्रस्ट. ।

मिश्रो, रामानन्दः (ई.सं.१९८३), *भूषणसारलघुमञ्जुषयोः सिद्धान्तानां समीक्षा,* वाराणसी : सम्पूर्णानन्द संस्कृतविश्वविद्यालयः ।